International Journal of Sanskrit Research 2018; 4(5): 121-123

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(5): 121-123
© 2018 IJSR
www.anantaajournal.com
Received: 24-07-2018
Accepted: 25-08-2018

**सुनीति**
शोध–छात्रा, वेद व्यास, परिसर, बलाहर, कांगड़ा, हिमाचल–प्रदेश, भारत

**Correspondence**
**सुनीति**
शोध–छात्रा, वेद व्यास, परिसर, बलाहर, कांगड़ा, हिमाचल–प्रदेश, भारत

# भोजराजस्य साहित्यिकमवदानम्

## सुनीति

**प्रस्तावना**

अस्ति क्षितावमरावतीव काचिन्नगरी। नाम्ना सा उज्जयिनीति ज्ञायते[1]। तत्र च केचन परमारवंशीया राजानो महासौख्येन, प्रजानामुपकारं कुर्वाणाः उन्नतिमादधानास्तां शशासुः। वंशेऽस्मिन् सर्वप्रथमराजा उपेन्द्रः। सोऽयं परमारवंशः पुरा किल विश्वामित्र कृतकामधेनुसमाकर्षणसमये प्रभावशाली महर्षेः वशिष्ठस्यानुध्यानेन विश्वामित्रबलजयकांक्षया अग्निकुण्डात् समुद्भूत इति स्वकृतालंकारग्रन्थे सरस्वती–कण्ठाभरणनायकगुणप्रसंगे महाराजेन भोजेन उल्लिखितः[2]।

नृपतेरुपेन्द्रादनन्तरमन्ये ये च राजानो वंशेऽस्मिन्नभूवन् तेषां क्रमो यथा– वैरसिंहः–सीयकः–वाक्पतिराजः–सिन्धुलः–भोजराजश्चेति। अयं च वंशेतिहासो भोजराजकृतः षट्सप्त्यधिकैकसहस्रविक्रमसंवत्सरे (1076) अष्टसप्तत्युत्तरैकसहस्रसंवत्सरे (1078) च वेटमाख्यशिलालेखात् उज्जयिनीसंज्ञकशिलालेखाच्च क्रमशो ज्ञायते। एतेषु च राजसु वाक्पतिराजस्य द्वावेवास्तां पुत्रौ सिन्धुलो मुंजश्चेति। तेषां सिन्धुलः दयादाक्षिण्यादिगुणैर्विभूषितः सिन्धुरिव गम्भीरश्च आसीत्। तस्य च शचीव सावित्री नाम्नी राज्ञी आसीत्। परमारवंशे सिन्धुलस्यौरसात् सावित्रयाः गर्भात् सर्वगुणयुक्तः एकः पुत्रो जातः यः भोज इति नाम्ना ख्यातोऽभूत्। परिणतवयसि सिन्धुलराजः शैशवाद्धेतोः स्वपुत्रं भोजं बालमिति मत्वा अनुजाय मुंजाय राज्यभारं समर्प्य दिवंगतः। तदनु भोजे समर्थे सति मुंजो भोजाय राज्यं दत्वा वनं जगाम। भोजस्य पत्नी आसीत् लीलावती, एकः पुत्रो जयसिंह एका च कन्या भानुमतीति[3]। महाराजाधिराजस्य सर्वागमार्थनिर्णेतुर्भोजराजस्य दीक्षागुरुरासीत् सर्वविद्याधिपोऽमितप्रभो द्वैतवादी उत्तुंगशिवः। सोऽयमुत्तुंगशिवो लाटप्रदेशस्य कल्याणनगरीवासी आसीत्।[4]

उत्तुंगशिवस्य सार्थकशिष्योऽयं भोजराजः महान् शास्त्रज्ञो, दानशीलो, दयाशीलो एतैर्गुणैर्विमण्डितोऽभूत्। सोऽयं भोजोऽयोध्यायां प्रजानुरंजनो राम इव प्रजापालनमकरोत्।

विबुधानुगामी भोजराजोऽयं किल दानशौण्डः। तस्य दृष्टिर्यस्योपरि निपतति तस्य च जनस्य दुःखदारिद्र्यादिकं समूलं विनश्यति। भोजः कवीनामुपरि सन्तुष्टः सन् ''प्रत्यक्षरं लक्षं ददौ'' इत्यादि रूपेणास्य दानशीलतां वल्लालसेनः स्वकृते 'भोजचरिते' प्रत्यपादयत्–

एकदा राजा मार्गं प्रत्यागच्छन्तं कमपि विप्रं ददर्श। तस्य करे चर्ममयं कमण्डलुं वीक्ष्य तं चातिदरिद्रं ज्ञात्वा आह– 'विप्र! चर्मपात्रं किमर्थं पाणौ वहसि इति'। स च विप्रो नूनं मुखशोभया मृदूक्त्या च भोज इति विचार्याह– 'देव, वदान्यशिरोमणौ भोजे पृथ्वीं शासति लोहताम्राभावः समजनि। तेन चर्ममयं पात्रं वहामि इति'। राजा–भोजे शासति लोहताम्राभावे को हेतुः। तदा विप्रः कथयति–

> अस्य श्रीभोजराजस्य द्वयमेव सुदुर्लभम्।
> शत्रूणां शृंखलैर्लोहं ताम्रं च दानपत्रकैः। (भो. प्र.–126)

ततस्तुष्टो राजा प्रत्यक्षरं लक्षं ददौ। कदाचिच्च स्वयमेव राज्ञा भोजेन निगदितम्–

''यश्च मेऽमात्यादिषु वितरणनिषेधमनाः स हन्तव्यः'' इति।

एतेनानुमातुं शक्यते भोजस्य दानशौण्डत्वम्। जनकल्याणकारिणा भोजनरपतिना जनानामुपकारार्थं वापीकूपतडागादीनि निर्मितानि। धारानगर्य्यामनेन 'सरस्वतीकण्ठाभरणपाठशाला' प्रतिष्ठिता। उदरपुरप्रशस्त्यां लिखितमस्ति यत् धाराधीशेन केदार–रामेश्वर–सोमनाथ–सुण्डीर–कालनलादीनि मन्दिराणि निर्मितानि[5]।

राजतरंगिणीकारेण कल्हणकविना उल्लिखितं यद् भूवल्लभेन भोजेन कपटेश्वरनामके स्थाने कुण्डनिर्माणं कृतम्[6]।

कुण्डेऽस्मिन् संयोजितानि प्रस्तराणि भोजस्य कीर्तिं निगदन्ति। अनेकानि शिवमन्दिराणि भोजराजेनानेन प्रतिष्ठितानीति हेतोः सः शैवोपासक इति निश्चप्रचं वक्तुं शक्यते। शैव दर्शनसिद्धान्तोपरि 'तत्त्वप्रकाशः' इति कारिकाग्रन्थः तेन विरचितः। अत्र तस्य शिवानुरागिता प्रकटिता[7]।

परमारवंशमणिर्मालवाधिपतिर्भोजोऽमितविक्रमशाली आसीत्। परैः राष्ट्रैस्सह युद्धमभवत्। विजितानि राज्यानि मालवेऽन्तर्गतानि अभवन्। प्रभावशालिनस्तस्य राज्ञो धाराधीशस्य साम्राज्यमाकैलासामलयपर्वतपर्यन्तं विस्तारितमासीदिति शिलालेखात् ज्ञायते। पुनश्च स चेदि–कर्णाट–लाट–गुर्जर–तुरस्कान् देशान् विजितवान्। राजाधिराजो महाराजो भोजदेवो विभिन्नैः शास्त्रनिबन्धकारैः विभिन्नैर्नामभिः परिचितम्। सः भोजराज–भोजनृपतिः–भोजदेव–रणरंगमल्ल–भूपालाः इत्येतैः प्रकीर्त्तितः। धारानगर्य्याः आधिपत्यात् स धारेश्वर–धाराधीश–धारासूरि–धारेश्वरभट्टा इत्यपि कथितः। पुनश्च मालवाधिपत्यात् मालवाधिपतिः, विदर्भदेशाधिपतित्त्वात् विदर्भराज इत्यपि उच्यते स्म। अस्य च राज्ञो प्रकृतं श्रद्धानाम भोज इति आसीत्।

**कृतयः–** भारतीयेतिहासे ये ये राजानस्तेषां प्रचण्डप्रतिभया विद्वत्तया च पूज्या अभवन् तेषु सकलसुधाधिपति–चक्रवर्तिकाव्यार्थकोविदविद्वन्मणिः संस्कृतविद्याप्रचार– प्रसारणपटुसुधीजन प्रियोऽयं भोजराजोऽन्यतमः। महाराजस्य विक्रमादित्यस्य न्यायस्तदा प्रसिद्धिं गता यदा महाराजस्याशोकस्य धर्मप्रचारो महाराजभोजस्य च साहित्यसृजनशीलता युगपत् प्रसिद्धिं गता[8]। जि. एस्. जोसेरिमहाभागानुसारं भोजराजो वाणीपृष्ठपोषकः कविपृष्ठपोषकश्चासीत्। महाराजस्य भोजस्य साहित्यिक परिचय एव तस्य काव्यकृतयः।

स तु नितरां वाग्देव्याः सेवक आसीत्। तमेव भोजदेवं बहवः शास्त्रकाराः ससम्मानमुद्धरन्ति। केशवार्क–क्षीरस्वामि–सायण–चित्तप–देवेश्वर–विनायकशंकर–सरस्वती–कुटुम्बदुहितृ–ईशान–देवमिश्रादयः कवयः स्वासु सर्वासु कृतिषु भोजमतमुद्धरन्ति।

न केवलोऽयं राजा साहित्यशास्त्रेषु कृतविद्य आसीत् अपितु व्याकरण–ज्योतिष–शैवदर्शन–वास्तुविद्या–तर्कालंकार–शाकुन–स्वप्न–सामुद्रिक–निमित्त–व्याख्यानप्रश्न–धर्मशास्त्र–चिकित्साशास्त्र–अर्थशास्त्र–चम्पू–कथादिशास्त्रेषु निपुणश्चासीत्[9]।

भोजस्य श्रेष्ठकृतिसरस्वतीकण्ठाभरणस्योपरि कृतटीकातो ज्ञायते यत् तस्य चतुरशीतिसंख्यका कृतयः सन्तीति[10]।

भोजराजलिखितग्रन्थानां नामानि आलफ्रेट्महाभागलिखितं कैटलागस् कैटलागोरम् पुस्तकात् प्राप्यते। अन्यत्रापि च नामानि संगृह्य भोजस्य काव्यकृतीनामुल्लेखनं वर्गीकरणानुसारं लिख्यन्ते।

काव्यशास्त्रे– सरस्वतीकण्ठाभरण–शृंगारप्रकाशौ प्राप्येते।

व्याकरणशास्त्रे– सरस्वतीकण्ठाभरणः, शब्दानुशासनं, भर्तृहरिकारिका चेति। कोषशास्त्रे– एको ग्रन्थः प्राप्यते। यथा– नामलतिका। अश्वशास्त्रे– शालिहोत्रमेकं रचितम्।

योगशास्त्रे– राजमार्त्तण्डः, योगसूत्रवृत्तिः, द्रव्यानुयोगः, तर्कणाटीका च। चिकित्साशास्त्रे– आयुर्वेदसर्वस्वः, राजमृगांकः, विश्रान्तविद्याविनोदश्च। शैवदर्शने– सिद्धान्तसंग्रहः, तत्वप्रकाशः, शिवतत्वरत्नकलिका चेति।

ज्योतिष्शास्त्रे– आदित्यप्रतापसिद्धान्तः, राजमार्त्तण्डः, भुजबलनिबन्धः, भीमपराक्रमः, सिद्धान्तसारपद्धतिः, मेघमाला, राजमृगांक, विद्वज्जनवल्लभः, प्रश्नज्ञानं चेति।

वास्तुशास्त्रे– समरांगणसूत्रधारः, युक्तिकल्पतरुश्च। धर्मशास्त्रे नीतिशास्त्रे च चारुचर्या, व्यवहारसमुच्चयः, चाणक्यनीतिः, विविधविद्याचातुरी च। अन्ये च काव्य–कथा–चम्पू–प्रकीर्णादयः ग्रन्थाः यथा– चम्पूरामायण–विद्याविनोदकाव्य–सुभाषितप्रबन्ध–कूर्मशतक–अवनिशतक–पारिजातमंजरी–शृंगारमंजरी–कोदण्ड–अज्ञात– नामप्राकृतकाव्यादयःप्रमुखाः।

एतासु च कृतिषु भोजराजस्य विद्वत्ता–पाण्डित्य–पण्डितप्रियता–सरस्वत्याराधनादिगुणा स्वतोऽनुमिता भवन्ति।

गुणिगणमुकुटालंकारविद्वन्मणिः साहित्य–ज्योतिषशैववैद्यक–तर्क–शाकुन–धर्मशास्त्र–वास्तुविद्यादिशास्त्रेषु कृतभूरिपरिश्रमो देवालयपुस्तकालयादिनिर्माणे नित्यनिरतिशयः प्रजापालने च दृढ़मतिरासीदयं भोजराजः। एवंभूत वाणीविलासप्रियः कविसत्तमः कं वा भूतलखण्डमध्यास्ते। पुण्यात्मना राज्ञाऽनेन को वाऽन्वयो जन्मनानुगृहीतः। का वाऽस्य वंशव्रततिः। कं वा राजसिंहासनमयमलंचकार। का वा काव्यावली अनेन विरचिताः। इत्यादिकं सर्वं विचार्य सम्प्रति तस्य कालं प्रयत्यते। तस्य समयनिर्णये प्रधानसहायकाः भवन्ति। तत्कृता ग्रन्थाः अभिलेखा अन्यानि च विवरणानि। पुनश्च तच्छासनकाले भोजराजेन दत्तानि दानपत्राणि ताम्रफलकादीनि चाधारीकृत्य तस्य कालो निर्द्धारयितुं शक्यते।

भोजराजेन 1076 विक्रमसंवत्सरे (1020 खीष्टाब्दे) कस्मैचिद् दानपत्रमेकं प्रदत्तम्। अपरमेकं दानपत्रं 1078 विक्रमसंवत्सरे (1022 खीष्टाब्दे) दत्तम्। भोजराजं कल्हण–मम्मट–गोविंदानन्द–विज्ञानेश्वर–माधवाचार्य–जीमूतवाहन–नीलकण्ठ–रघुनन्दन जीवनानन्ददैवज्ञ–गदाधरराजगुरु–लक्ष्मीधरः–कमलाकर–मित्रमिश्र–श्रीदत्तोपाध्याय–बृहस्पत्यादयः ग्रन्थकाराः निबन्धकाराश्च स्वेषु ग्रन्थेषु समुद्धरन्ति। पुनश्च तस्य समसामयिकाः वाजसनेयसंहिताष्टीकाकार उव्वटः, दशरूपकस्य रचयिता धनिकः, तिलकमंजरीकर्त्ता धनपालश्च तमुद्धरन्ति। उदयपुरप्रशस्ति–शिलाभिलेखे तस्य प्रशंसा प्राप्यते[11]। परन्तु भोजदेवः कस्मिन् निर्दिष्टे दिनांके आविर्बभूव तिरोदधान चेति तद्विज्ञातुं नैव शक्यते। अधिकन्तु वल्लासेनकृत[12] 'भोजप्रबन्ध' मिति पुस्तकाद् दैवज्ञशिखामण्युक्तवचनात् ज्ञायते यत् भोजो दिनत्रयाधिक–सप्तमासोत्तरं पंचाशत्–पंचवर्षाणि यावत् जीवित आसीत्।

विभिन्नानामैतिहासिकानां मतानुसारमभिलेखानां चालोचनानुसारं भोजस्य कालो निर्णेतुं शक्यते। नागौरनामकस्थाने एकः शिलालेखः प्राप्यते यस्य समयः एकषष्ठ्यधिकैकादशशत (1161) संवत्सरः (1104 खीष्टाब्दः)। तस्मिन् शिलालेखे अस्य राज्ञः पूर्वपुरुषेभ्य आरभ्य भोजं यावदुल्लेखो विद्यते[13]। एतेन निश्चप्रचं वक्तुं शक्यते यत् स चतुरधिकैकादशशतकात् (1104) पूर्ववर्तिकाले एवासीन्न तु ततः परं भवितुमर्हति। परन्तु विण्टरनित्जमहाभागानुसार[14] भोजस्य समयोऽष्टादशोत्तरैकसहस्र (1018) खीष्टाब्दारभ्य षष्ट्युत्तरैकसहस्र (1060) खीष्टाब्दपर्यन्तं निर्द्धारितः। शृंगारप्रकाशव्याख्याकारः डा. राघवन्मतानुसारेण दशाधिकदशशत (1010) खीष्टाब्दतः द्विषष्ट्यधिकदशशत (1062) खीष्टाब्दमध्ये भोजो राज्यं शशासेति। आलवेरुनीनामकेन केनचिद् विदेशिपर्यटकेन 'इण्डिका' नाम्नी पुस्तिकायां लिखितं यद् भोजदेवः त्रिंशदधिकैकसहस्र (1030) खीष्टाब्दे राज्यशासने प्रवृत्त आसीत्। अपि च जि. एस् जोसेरिमहाभागस्य[15] मतानुसारं भोजो मालवे दशाधिकैकसहस्र (1010) खीष्टाब्दे राज्यशासनमकरोत्।

भोजविरचित चम्पूरामायणस्योपरि रामचन्द्रबुधेन्द्रलक्ष्मणसूरिभ्यां[16] व्याख्या विरचिता। तस्याष्टीकायाः भूमिकाभागे वेंकटनरसिंहाचार्येण धाराधीशस्य भोजदेवस्य समयोऽष्टादशाधिकदशशत (1018) खीष्टाब्दात् षष्ट्यधिकदशशत (1060) खीष्टाब्दपर्यन्तमिति निरूपितम्।

एतदतिरिच्य कतिपय शिलालेखा अपि भोजदेवस्य शासनकालीना भवन्ति। प्रथमशिलालेख उज्जयिनीशिलालेखः। अस्य शिलालेखस्य समयोऽष्टसप्तत्यधिकैकसहस्र (1078) विक्रमसंवत्सर (1021 खीष्टाब्दः)। सोऽयमभिलेखो माघकृष्णतृतीयातिथौ रविवासरे लिखितः।

अत्र सीयकदेव– वाक्पतिराज–सिन्धुराज– भोजराजानां प्रशस्तिः दृश्यते[17]।

द्वितीयशिलालेखो वंशधराभिलेखः। सः लेखः षट्सप्तत्युत्तरदशशत (1076) विक्रमसंवत्सरे माघामावस्यायां नाम विंशत्यधिकदशशत (1020) खीष्टाब्दे जनवरीमासस्य त्रयोविंशतितारिकायां विरचितः। शिलालेखेऽस्मिन् भोजदेवस्य कोंकणविजयोत्सवविषयो वर्णितः।

तृतीयः शिलालेखो वेटमाशिलालेख यो विंशत्युत्तरैकसहस्र (1020) खीष्टाब्दे सेप्टेम्वरमासस्य पंचदशतारिकायामर्थात् षट्सप्तत्यधिकैकसहस्र (1076) विक्रमाब्दस्य भाद्रपदामावास्यायां लिखितः। अत्रापि भोजराजस्य कोंकणविजयप्रशस्तिः वर्णितोऽस्ति।

चतुर्थशिलालेखः त्रयधिकैकादशशततमे (1103) विक्रमाब्दे (1046 खीष्टाब्दे) मार्गशीर्षमासे विरचितः। अत्र भोजप्रशस्तिः दृश्यते।

पंचमोऽभिलेखः कलभनशिलालेखः। सोऽयं लेखश्चैत्रमावास्यायां रचितः। तस्मिन्नपि शिलालेखे कोंकणविजय प्रशस्तिश्चर्चितः। मुनिसुव्रतनामकदेवालयस्य निर्माणार्थं भूवल्लभेन भोजेन काचिद् भूमिः प्रदत्ता इत्यपि तत्र वर्णितं दृश्यते।

षष्ठशिलालेखानुसारं ज्ञायते यद् भोजेन एकनवत्युत्तरैकसहस्र (1091) तमे विक्रमाब्दे (1035 खीष्टाब्दे) वाग्देव्या एका प्रतिमूर्त्तिः प्रतिष्ठिता। सेयं वाग्देव्या मूर्त्तिरधुना ब्रिटिशसंग्रहालये संरक्षिता अस्ति।

एतान् शिलालेखान् व्यतिरिच्य अपरं प्रमाणं प्राप्यते। महाराजेन भोजेन राजमृगांकाख्यः करणग्रन्थः प्रस्तुत। ग्रन्थेऽस्मिन् ज्योतिषे किंचन गाणितिकं सूत्रं भूपालेन प्रतिपादितम्[18]। तदनुसारं ज्ञायते यदयं ग्रन्थश्चतुः षष्ट्यधिकनवशत (964) तमे शाकसंवत्सरे प्रबन्धितः। राजमृगांकः प्रमाणयति यद् भोजदेवः 1042–1043 खीष्टाब्दमध्ये राज्यशासनरतः आसीत्। ऐतिहासिक प्रोफेसर एस. के. दे. महाभागानुसारं भोजो दशोत्तरदशशत (1010) खीष्टाब्दतः पंचपंचाशदुत्तरदशशत (1055) खीष्टाब्दं यावत् राज्यशासने चासीत्। स तु कस्मिन् दिनांके दिवंगत इति वक्तुं नैव शक्यते। एतत्तु ज्ञायते यद् गुर्ज्जरदेशीयेन राज्ञा भीमेन पुनश्च त्रिपुरीराजेन कालचूरीकर्णेन साकं भोजस्य दीर्घकालं यावद् युद्धमभूत्। युद्धे पीडितः सन् दीर्घसमयपर्यन्तं रोगग्रस्तो भूत्वा किंचित् कालानन्तरं स्वर्गतोऽभूदिति प्रोफेसर एस्. के. दे. महाभागानां मतम्।

जयसिंहदेवस्य मान्धाताभिलेखे (1112) विक्रम–संवत्सरे लिखितं यद् भोजो दशाधिकैकादशशत (1110) विक्रम–संवत्सरे (1053–1054 खीष्टाब्दे) मृत इति। अतो भोजराजस्य समयः पंचाधिकैकसहस्र (1005) खीष्टाब्दतः चतुःपंचाधिकैकसहस्र (1054) खीष्टाब्दपर्यन्तमिति महामहोपाध्यायानां 'भारतरत्न'मिति प्राप्तपुरस्काराणां पि. वि. काणेमहाभागानां मतम्। भोजस्य सरस्वतीकण्ठाभरणः, श्रृंगारप्रकाशश्चेति कृतिद्वयं तस्यान्तिमावस्थायां रचितम्। तेन राज्यशासनं 1005 खीष्टाब्दतः 1054 खीष्टाब्द यावत् कृतम्।

अन्ते च एतेषु युक्तिप्रमाणाभिलेखग्रन्थप्राप्तवचनेषु एतन्निश्चेतुं शक्यते यदस्य धाराधीशस्य भोजराजस्य राज्यशासनकालः दशाधिकैकसहस्र (1010) खीष्टाब्दतः षष्ट्युत्तरैकसहस्र (1060) खीष्टाब्दमध्ये एवेति। अतो य एवंभूत राजा सन् प्रजानामुपकारं विधाय वाणीदेवीपूजने नित्यनिरतिशयमतिः स धाराधीशः भोजदेवोऽस्माकं चिरनमस्यः चिरस्मरणीयश्चेति। अन्ते च–

भोज त्वत्कीर्तिकान्ताया नभोभालस्थितं महत्।
कस्तूरीतिलकं राजन् गुणाकर विराजते।। (भो. प्र. पृ.–49)

## सन्दर्भ ग्रन्थ

1. अस्ति क्षितावुज्जयिनीति नाम्ना पुरी विहायस्यमरावतीव।
   बबन्ध यस्यां पदमिन्द्रकल्पो महीपतिर्वाक्पतिराजदेवः।। (नवसाहसांकचरितम्, 1.7)
2. वासिष्ठैः स्वकृतोद्भवोऽध्वरशतैरस्त्यग्निकुण्डोद्भवैः,
   भूपालः परमार इत्यधिपतिः सप्ताब्धिकांचेर्भुवः।
   अद्याप्यद्भुतहर्षगद्गदगिरो गायन्ति यस्योद्भटम्,
   विश्वामित्रजयोर्जितस्य भुजयोर्विस्फूर्जितं गुर्जराः।। (सं. क. प.प. श्लो. 47 पृ.–590)
3. पा. यो. भोजराजकृतराजमार्त्तण्डवृत्तिसमेतम्– भूमिका– पृ.–26
4. ततोऽभूल्लाट उत्तुंगशिवो विन्ध्ये व्रतीश्वरः,
   कल्याणनगरनिवासी गुरुः पद्धतित्सुधीः।
   सर्वविद्याधियो यस्य कनीयानार्यदेशजः,
   सर्वागमार्थनिर्णेतुः श्रीभोजनृपतेः गुरुः।। (के. सी. पाण्डेयकृत– भास्कर भा. 3 पृ.–226)
5. केदार–रामेश्वर–सोमनाथ–सुण्डीर–कालानल–रुद्रसत्कैः।
   सुराश्रयैर्व्याप्य च यः समन्ताद्यर्थाय संज्ञा जगतीं चकार।। (इ. आइ. भा. 1 पृ.–326)
6. मालवाधिपतिर्भोजः प्रहितैः स्वर्णसंचयैः।
   अकारयद्येन कुण्डयोजनं कपटेश्वरे।। (रा.त. 7 / 190)
7. तत्त्वानामपि तत्त्वं येनाखिलमेव लीलया कथितम्।
   श्रीभोजदेवनृपतिर्व्यदधतत्त्वप्रकाशं सः।। (त. प्र. श्लोक–75 पृ.–145)
   यस्याखिलं करतलमलकक्रमेणदेवस्य विस्फुरति चेतसि तत्त्वजातम्।
   श्रीभोजदेवनृपतिः स शिवागमार्थ तत्त्वप्रकाशमसमानमिदं व्यधत्त।। (त. प्र. श्लो.– 76, पृ.–147)
8. महाराज विक्रमादित्य का यदि न्याय प्रसिद्ध है, तो महाराजा अशोक का धर्म–प्रचार और महाराजा भोज की साहित्यिक गरिमा। (भा. वा. पृ.–1)
9. भोजव्याकरणं ह्येतच्छब्दशास्त्रं प्रवर्त्तते।
   असौ हि मालवाधीशो विद्वच्चक्रशिरोमणिः।।
   शब्दालंकार–दैवज्ञ–तर्कशास्त्राणि निर्ममे।
   चिकित्सा–राजसिद्धान्त–तरुवास्तूदयानि च।।
   अंकशाकुनकाध्यात्म–स्वप्नसामुद्रिकाण्यपि।
   ग्रन्थान् निमित्तव्याख्यानप्रश्नचूडामणीनिह।
   विवृत्तिं चाथ सद्भावेऽर्थशास्त्रं मेघमालया।।
   (चन्द्रप्रभसूरिकृत–प्रभावकचरिते, श्लोक–475–478)
10. इह हि शिष्टशिरोमणि निखिलनिरवद्यविधानिर्माण अपूर्वप्रजापति–प्रचण्ड–भुजदण्डपराक्रमार्जित–चतुरशीतिविरुद–प्रकाशितस्वकृतग्रन्थसमाजा श्रीभोजराज शास्त्रारम्भे.....।
    (राघवन् संपादित श्रृंगारप्रकाशे, पृ.–5)
11. साधितं विहितं दत्तं तद् यन्न केनचित्।
    किमन्यत्कविराजस्य श्रीभोजस्य प्रशस्यते। (उदयपुरप्रशस्तिः)
12. पंचाशत्पंचवर्षाणि सप्तमासा दिनत्रयम्।
    भोजराजेन भोक्तव्यः स गौडो दक्षिणापथा।। (भो. प्र. पृ.–4)
13. इ. आइ. भा.–2, पृ.– 183–185
14. Much more famous as a lover of poets is Bhoja (1018-1060A.D.) a nephew of Munja. There are number of tales and anecdotes told about his love literature and about his generosity towards poets and learned men very like those about the Vikrmaditya ofthe tradition (A His of in. Ltv. Vol-3 Parts, PP. 63)
15. Reigning in Malwa about 1010 A.D. (Srungar Prakash edited by G.S. Josyer Vol-2,PP-1)
16. एतेषु वाक्पतिराजापराभिधानेन मुंजेन विक्रमसंवत् 1031 (क्री. 974) तमे दानशासनमकारि। सुप्रसिद्ध भोजराजश्च विक्रमसंवत् 1078 तमात् (क्री. 1021) परं गोविन्दभट्टसुताय धनपतिभट्टाय वीराणकग्राममददादिति शासनेनावगम्यते। एतदात्मजो जयसिंहदेवश्च विक्रमसंवत् 1112 (क्री. 1054) तमे किमपि शासनमचीकरत्। एतेषां शासनानामुपलब्धा क्रीस्तुशकात् 1018 तमात् परं क्री.1060 पर्यन्तं भोजदेवो राज्यमशिषदिति युक्तमुत्पश्यामः। (च. रा. भूमिकाभागः, पृ.–1)
17. पि. वि. काणे. ध. शा. इ. भा.–1, पृ.–589
18. शाको वेदर्त्तुनन्दनो रवीन्दामाससंयुतः।
    अधो देवान्वितो द्विस्थस्त्रिवेदघ्नस्तयोहृतः।। (ध. शा. इ. पी. वी. काणे भा.–1, पृ.–590)